# Shri Venkatesha Suprabhatam

# શ્રીવેઙ્કટેશસુપ્રભાતમ્

## Document Information

Text title : Venkatesha Suprabhatam

File name : venkatsp.itx

Category : suprabhAta, vishhnu, venkateshwara, vishnu, mangala

Location : doc_vishhnu

Transliterated by : Srinivas Sunder sunder at crystal.cirrus.com

Proofread by : Srinivas Sunder, PSA Easwaran, NA

Description-comments : Includes suprabhAtam prapatti maNgalAshAsanaM stotram

Latest update : January 27, 1995, January 12, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 12, 2024

*sanskritdocuments.org*

# શ્રીવેઙ્કટેશસુપ્રભાતમ્

સુપ્રભાતમ્ પ્રપત્તિ મઙ્ગલાશાસનં સ્તોત્રં સહિતમ્
॥ શ્રીઃ ॥

## અથ શ્રીવેઙ્કટેશસુપ્રભાતમ્ ।

કૌસલ્યા સુપ્રજા રામ પૂર્વા સન્ધ્યા પ્રવર્તતે ।
ઉત્તિષ્ઠ નરશાર્દૂલ કર્તવ્યં દૈવમાહ્નિકમ્ ॥ ૧॥

ઉત્તિષ્ઠોત્તિષ્ઠ ગોવિન્દ ઉત્તિષ્ઠ ગરુડધ્વજ ।
ઉત્તિષ્ઠ કમલાકાન્ત ત્રૈલોક્યં મઙ્ગલં કુરુ ॥ ૨॥

માતસ્સમસ્તજગતાં મધુકૈટભારેઃ
વક્ષો વિહારિણિ મનોહરદિવ્યમૂર્તે ।
શ્રીસ્વામિનિ શ્રિતજન પ્રિયદાનશીલે
શ્રીવેઙ્કટેશદયિતે તવ સુપ્રભાતમ્ ॥ ૩॥

તવ સુપ્રભાતમરવિન્દલોચને
ભવતુ પ્રસન્નમુખચન્દ્રમણ્ડલે ।
વિધિશઙ્કરેન્દ્રવનિતાભિરર્ચિતે
વૃષશૈલનાથદયિતે દયાનિધે ॥ ૪॥

અત્ર્યાદિ સપ્તઋષયસ્સમુપાસ્ય સન્ધ્યાં
આકાશસિન્ધુકમલાનિ મનોહરાણિ ।
આદાય પાદયુગમર્ચયિતું પ્રપન્નાઃ
શેષાદ્રિશેખરવિભો તવ સુપ્રભાતમ્ ॥ ૫॥

પઞ્ચાનનાબ્જભવ ષણ્મુખ વાસવાદ્યાઃ
ત્રૈવિક્રમાદિચરિતં વિબુધાઃ સ્તુવન્તિ ।
ભાષાપતિઃ પઠતિ વાસર શુદ્ધિમારાત્

શેષાદ્રિશેખરવિભો તવ સુપ્રભાતમ્ ॥ ૬॥

ઈષત્પ્રફુલ્લસરસીરુહનારિકેલ-
પૂગદ્રુમાદિ સુમનોહરપાલિકાનામ્ ।
આવાતિ મન્દમનિલસ્સહ દિવ્યગન્ધૈઃ
શેષાદ્રિશેખરવિભો તવ સુપ્રભાતમ્ ॥ ૭॥

ઉન્મીલ્ય નેત્રયુગમુત્તમપઞ્જરસ્થાઃ
પાત્રાવશિષ્ટકદલીફલપાયસાનિ ।
ભુક્ત્વા સલીલમથ કેલિશુકાઃ પઠન્તિ
શેષાદ્રિશેખરવિભો તવ સુપ્રભાતમ્ ॥ ૮॥

તન્ત્રીપ્રહર્ષમધુરસ્વનયા વિપઞ્ચ્યા (તન્ત્રીપ્રકર્ષ)
ગાયત્યનન્તચરિતં તવ નારદોઽપિ ।
ભાષા સમગ્રમસકૃત્કરચારરમ્યં
શેષાદ્રિશેખરવિભો તવ સુપ્રભાતમ્ ॥ ૯॥

ભૃઙ્ગાવલી ચ મકરન્દરસાનુવિદ્ધ-
ઝઙ્કારગીત નિનદૈઃ સહ સેવનાય ।
નિર્યાત્યુપાન્તસરસીકમલોદરેભ્યઃ
શેષાદ્રિશેખરવિભો તવ સુપ્રભાતમ્ ॥ ૧૦॥

યોષાગણેન વરદધ્નિ વિમથ્યમાને
ઘોષાલયેષુ દધિમન્થનતીવ્રઘોષાઃ ।
રોષાત્કલિં વિદધતે કકુભશ્ચ કુમ્ભાઃ
શેષાદ્રિશેખરવિભો તવ સુપ્રભાતમ્ ॥ ૧૧॥

પદ્મેશમિત્રશતપત્રગતાલિવર્ગાઃ
હર્તું શ્રિયં કુવલયસ્ય નિજાઙ્ગલક્ષ્મ્યા ।
ભેરીનિનાદમિવ બિભ્રતિ તીવ્રનાદં
શેષાદ્રિશેખરવિભો તવ સુપ્રભાતમ્ ॥ ૧૨॥

શ્રીમન્નભીષ્ટવરદાખિલલોકબન્ધો
શ્રી શ્રીનિવાસ જગદેકદયૈકસિન્ધો ।
શ્રીદેવતાગૃહભુજાન્તર દિવ્યમૂર્તે
શ્રીવેઙ્કટાચલપતે તવ સુપ્રભાતમ્ ॥ ૧૩॥

શ્રીસ્વામિપુષ્કરિણિકાઽઽપ્લવનિર્મલાઙ્ગાઃ
    શ્રેયોઽર્થિનો હરવિરિઞ્ચિ સનન્દનાદ્યાઃ ।
દ્વારે વસન્તિ વરવેત્રહતોત્તમાઙ્ગાઃ
    શ્રીવેઙ્કટાચલપતે તવ સુપ્રભાતમ્ ॥ ૧૪॥

શ્રીશેષશૈલ ગરુડાચલ વેઙ્કટાદ્રિ
    નારાયણાદ્રિ વૃષભાદ્રિ વૃષાદ્રિમુખ્યામ્ ।
આખ્યાં ત્વદીયવસતેરનિશં વદન્તિ
    શ્રીવેઙ્કટાચલપતે તવ સુપ્રભાતમ્ ॥ ૧૫॥

સેવાપરાઃ શિવસુરેશકૃશાનુધર્મ-
    રક્ષોઽમ્બુનાથ પવમાન ધનાધિનાથાઃ ।
બદ્ધાઞ્જલિપ્રવિલસન્નિજશીર્ષદેશાઃ
    શ્રીવેઙ્કટાચલપતે તવ સુપ્રભાતમ્ ॥ ૧૬॥

ધાટીષુ તે વિહગરાજ મૃગાધિરાજ
    નાગાધિરાજ ગજરાજ હયાધિરાજાઃ ।
સ્વસ્વાધિકારમહિમાધિકમર્થયન્તે
    શ્રીવેઙ્કટાચલપતે તવ સુપ્રભાતમ્ ॥ ૧૭॥

સૂર્યેન્દુભૌમબુધવાક્પતિકાવ્યસૌરિ-
    સ્વર્ભાનુકેતુ દિવિષત્પરિષત્પ્રધાનાઃ ।
ત્વદ્દાસ દાસચરમાવધિ દાસદાસાઃ
    શ્રીવેઙ્કટાચલપતે તવ સુપ્રભાતમ્ ॥ ૧૮॥

ત્વત્પાદધૂલિભરિતસ્ફુરિતોત્તમાઙ્ગાઃ
    સ્વર્ગાપવર્ગનિરપેક્ષનિજાન્તરઙ્ગાઃ ।
કલ્પાગમાકલનયાઽઽકુલતાં લભન્તે
    શ્રીવેઙ્કટાચલપતે તવ સુપ્રભાતમ્ ॥ ૧૯॥

ત્વદ્ગોપુરાગ્રશિખરાણિ નિરીક્ષમાણાઃ
    સ્વર્ગાપવર્ગપદવીં પરમાં શ્રયન્તઃ ।
મર્ત્યા મનુષ્યભુવને મતિમાશ્રયન્તે
    શ્રીવેઙ્કટાચલપતે તવ સુપ્રભાતમ્ ॥ ૨૦॥

શ્રીભૂમિનાયક દયાદિગુણામૃતાબ્ધે
    દેવાધિદેવ જગદેકશરણ્યમૂર્તે ।

શ્રીમન્નનન્તગરુડાદિભિરર્ચિતાઙ્ઘ્રે
    શ્રીવેઙ્કટાચલપતે તવ સુપ્રભાતમ્ ॥ ૨૧॥

શ્રીપદ્મનાભ પુરુષોત્તમ વાસુદેવ
    વૈકુણ્ઠ માધવ જનાર્દન ચક્રપાણે ।
શ્રીવત્સચિહ્ન શરણાગતપારિજાત
    શ્રીવેઙ્કટાચલપતે તવ સુપ્રભાતમ્ ॥ ૨૨॥

કન્દર્પદર્પહરસુન્દરદિવ્યમૂર્તે
    કાન્તાકુચામ્બુરુહકુડ્મલલોલદૃષ્ટે ।
કલ્યાણનિર્મલગુણાકરદિવ્યકીર્તે
    શ્રીવેઙ્કટાચલપતે તવ સુપ્રભાતમ્ ॥ ૨૩॥

મીનાકૃતે કમઠકોલનૃસિંહવર્ણિન્
    સ્વામિન્ પરશ્વથતપોધન રામચન્દ્ર ।
શેષાંશરામ યદુનન્દન કલ્કિરૂપ
    શ્રીવેઙ્કટાચલપતે તવ સુપ્રભાતમ્ ॥ ૨૪॥

એલાલવઙ્ગઘનસારસુગન્ધિતીર્થં
    દિવ્યં વિયત્સરિતિ હેમઘટેષુ પૂર્ણમ્ ।
ધૃત્વાઽદ્ય વૈદિકશિખામણયઃ પ્રહૃષ્ટાઃ
    તિષ્ઠન્તિ વેઙ્કટપતે તવ સુપ્રભાતમ્ ॥ ૨૫॥

ભાસ્વાનુદેતિ વિકચાનિ સરોરુહાણિ
    સમ્પૂરયન્તિ નિનદૈઃ કકુભો વિહઙ્ગાઃ ।
શ્રીવૈષ્ણવાસ્સતતમર્થિતમઙ્ગલાસ્તે
    ધામાશ્રયન્તિ તવ વેઙ્કટ સુપ્રભાતમ્ ॥ ૨૬॥

બ્રહ્માદયસ્સુરવરાસ્સમહર્ષયસ્તે
    સન્તસ્સનન્દનમુખાસ્ત્વથ યોગિવર્યાઃ । (મુખાસ્તવ)
ધામાન્તિકે તવ હિ મઙ્ગલવસ્તુહસ્તાઃ
    શ્રીવેઙ્કટાચલપતે તવ સુપ્રભાતમ્ ॥ ૨૭॥

લક્ષ્મીનિવાસ નિરવદ્યગુણૈકસિન્ધો
    સંસારસાગરસમુત્તરણૈકસેતો ।
વેદાન્તવેદ્ય નિજવૈભવ ભક્તભોગ્ય
    શ્રીવેઙ્કટાચલપતે તવ સુપ્રભાતમ્ ॥ ૨૮॥

ઇત્થં વૃષાચલપતેરિહ સુપ્રભાતમ્
    યે માનવાઃ પ્રતિદિનં પઠિતું પ્રવૃત્તાઃ ।
તેષાં પ્રભાતસમયે સ્મૃતિરઙ્ગભાજાં
    પ્રજ્ઞાં પરાર્થસુલભાં પરમાં પ્રસૂતે ॥ ૨૯॥

॥ ઇતિ વેङ्કટેશસુપ્રભાતમ્ ॥

## અથ વેङ्કટેશસ્તોત્રમ્ ।

કમલાકુચચૂચુકકુङ्કુમતો
    નિયતારુણિતાતુલનીલતનો ।
કમલાયતલોચન લોકપતે
    વિજયી ભવ વેङ्કટશૈલપતે ॥ ૧॥

સચતુર્મુખષણ્મુખપઞ્ચમુખ-
    પ્રમુખાખિલદૈવતમૌલિમણે ।
શરણાગતવત્સલ સારનિધે
    પરિપાલય માં વૃષશૈલપતે ॥ ૨॥

અતિવેલતયા તવ દુર્વિષહૈઃ
    અનુવેલકૃતૈરપરાધશતૈઃ ।
ભરિતં ત્વરિતં વૃષશૈલપતે
    પરયા કૃપયા પરિપાહિ હરે ॥ ૩॥

અધિવેङ्કટશૈલમુદારમતે
    જનતાભિમતાધિકદાનરતાત્ ।
પરદેવતયા ગદિતાન્નિગમૈઃ
    કમલાદયિતાન્ન પરં કલયે ॥ ૪॥

કલવેણુરવાવશગોપવધૂ-
    શતકોટિવૃતા સ્મરકોટિસમાત્ ।
પ્રતિવલ્લવિકાભિમતાત્સુખદાત્
    વસુદેવસુતાન્ન પરં કલયે ॥ ૫॥

અભિરામગુણાકર દાશરથે

જગદેકધનુર્ધર ધીરમતે ।
રઘુનાયક રામ રમેશ વિભો
વરદો ભવ દેવ દયાજલધે ॥ ૬॥

અવનીતનયાકમનીયકરં
રજનીકરચારુમુખામ્બુરુહમ્ ।
રજનીચરરાજતમોમિહિરં
મહનીયમહં રઘુરામમયે ॥ ૭॥

સુમુખં સુહૃદં સુલભં સુખદં
સ્વનુજં ચ સુકાયમમોઘશરમ્ ।
અપહાય રઘૂદ્વહમન્યમહં
ન કથઞ્ચન કઞ્ચન જાતુ ભજે ॥ ૮॥

વિના વેઙ્કટેશં ન નાથો ન નાથઃ
સદા વેઙ્કટેશં સ્મરામિ સ્મરામિ ।
હરે વેઙ્કટેશ પ્રસીદ પ્રસીદ
પ્રિયં વેઙ્કટેશ પ્રયચ્છ પ્રયચ્છ ॥ ૯॥

અહં દૂરતસ્તે પદામ્ભોજયુગ્મ-
પ્રણામેચ્છયાઽઽગત્ય સેવાં કરોમિ ।
સકૃત્સેવયા નિત્યસેવાફલં ત્વં
પ્રયચ્છ પ્રયચ્છ પ્રભો વેઙ્કટેશ ॥ ૧૦॥

અજ્ઞાનિના મયા દોષાન્ અશેષાન્વિહિતાન્ હરે ।
ક્ષમસ્વ ત્વં ક્ષમસ્વ ત્વં શેષશૈલશિખામણે ॥ ૧૧॥

॥ ઇતિ વેઙ્કટેશસ્તોત્રમ્ ॥

## અથ વેઙ્કટેશપ્રપત્તિ ।

ઈશાનાં જગતોઽસ્ય વેઙ્કટપતેર્વિષ્ણોઃ પરાં પ્રેયસીં
તદ્વક્ષસ્સ્થલનિત્યવાસરસિકાં તત્ક્ષાન્તિસંવર્ધિનીમ્ ।
પદ્માલઙ્કૃતપાણિપલ્લવયુગાં પદ્માસનસ્થાં શ્રિયં
વાત્સલ્યાદિગુણોજ્જ્વલાં ભગવતીં વન્દે જગન્માતરમ્ ॥ ૧॥

શ્રીમન્ કૃપાજલનિધે કૃતસર્વલોક

સર્વજ્ઞ શક્ત નતવત્સલ સર્વશેષિન્ ।
સ્વામિન્ સુશીલ સુલભાશ્રિતપારિજાત
શ્રીવેઙ્કટેશચરણૌ શરણં પ્રપદ્યે ॥ ૨॥

આનૂપુરાર્પિતસુજાતસુગન્ધિપુષ્પ
સૌરભ્યસૌરભકરૌ સમસન્નિવેશૌ ।
સૌમ્યૌ સદાઽનુભવનેઽપિ નવાનુભાવ્યૌ
શ્રીવેઙ્કટેશચરણૌ શરણં પ્રપદ્યે ॥ ૩॥

સદ્યોવિકાસિસમુદિત્વરસાન્દ્રરાગ-
સૌરભ્યનિર્ભરસરોરુહસામ્યવાર્તામ્ ।
સમ્યક્ષુ સાહસપદેષુ વિલેખયન્તૌ
શ્રીવેઙ્કટેશચરણૌ શરણં પ્રપદ્યે ॥ ૪॥

રેખામયધ્વજસુધાકલશાતપત્ર
વજ્રાઙ્કુશામ્બુરુહકલ્પકશઙ્ખચક્રૈઃ ।
ભવ્યૈરલઙ્કૃતતલૌ પરતત્વ ચિન્હૈઃ
શ્રીવેઙ્કટેશચરણૌ શરણં પ્રપદ્યે ॥ ૫॥

તામ્રોદરદ્યુતિપરાજિતપદ્મરાગૌ
બાહ્યૈર્મહોભિરભિભૂતમહેન્દ્રનીલૌ ।
ઉદ્યન્નખાંશુભિરુદસ્તશશાઙ્કભાસૌ
શ્રીવેઙ્કટેશચરણૌ શરણં પ્રપદ્યે ॥ ૬॥

સપ્રેમભીતિ કમલાકરપલ્લવાભ્યાં
સંવાહનેઽપિ સપદિ ક્લમમાદધાનૌ ।
કાન્તાવવાઙ્ગ્મનસગોચરસૌકુમાર્યૌ
શ્રીવેઙ્કટેશચરણૌ શરણં પ્રપદ્યે ॥ ૭॥

લક્ષ્મીમહીતદનુરૂપનિજાનુભાવ-
નીલાદિદિવ્યમહિષીકરપલ્લવાનામ્ ।
આરુણ્યસઙ્ક્રમણતઃ કિલ સાન્દ્રરાગૌ
શ્રીવેઙ્કટેશચરણૌ શરણં પ્રપદ્યે ॥ ૮॥

નિત્યાનમદ્વિધિશિવાદિકિરીટકોટિ-
પ્રત્યુપ્તદીપ્તનવરત્નમહઃપ્રરોહૈઃ ।
નીરાજનાવિધિમુદારમુપાદધાનૌ

શ્રીવેઙ્કટેશચરણૌ શરણં પ્રપદ્યે ॥ ૯॥

વિષ્ણોઃ પદે પરમ ઇત્યુદિતપ્રશંસૌ
યૌ મધ્વ ઉત્સ ઇતિ ભોગ્યતયાઽપ્યુપાત્તૌ ।
ભૂયસ્તથેતિ તવ પાણિતલપ્રદિષ્ટૌ
શ્રીવેઙ્કટેશચરણૌ શરણં પ્રપદ્યે ॥ ૧૦॥

પાર્થાય તત્સદૃશસારથિના ત્વયૈવ
યૌ દર્શિતૌ સ્વચરણૌ શરણં વ્રજેતિ ।
ભૂયોઽપિ મહ્યમિહ તૌ કરદર્શિતૌ તે
શ્રીવેઙ્કટેશચરણૌ શરણં પ્રપદ્યે ॥ ૧૧॥

મન્મૂર્ધ્નિ કાલિયફણે વિકટાટવીષુ
શ્રીવેઙ્કટાદ્રિશિખરે શિરસિ શ્રુતીનામ્ ।
ચિત્તેઽપ્યનન્યમનસાં સમમાહિતૌ તે
શ્રીવેઙ્કટેશચરણૌ શરણં પ્રપદ્યે ॥ ૧૨॥

અમ્લાનહૃષ્યદવનીતલકીર્ણપુષ્પૌ
શ્રીવેઙ્કટાદ્રિશિખરાભરણાયમાનૌ ।
આનન્દિતાખિલમનોનયનૌ તવૈતૌ
શ્રીવેઙ્કટેશચરણૌ શરણં પ્રપદ્યે ॥ ૧૩॥

પ્રાયઃ પ્રપન્નજનતા પ્રથમાવગાહ્યૌ
માતુસ્સ્તનાવિવ શિશોરમૃતાયમાનૌ ।
પ્રાપ્તૌ પરસ્પરતુલામતુલાન્તરૌ તે
શ્રીવેઙ્કટેશચરણૌ શરણં પ્રપદ્યે ॥ ૧૪॥

સત્ત્વોત્તરૈસ્સતતસેવ્યપદામ્બુજેન
સંસારતારકદયાર્દ્ર દૃગઞ્ચલેન ।
સૌમ્યોપયન્તૃમુનિના મમ દર્શિતૌ તે
શ્રીવેઙ્કટેશચરણૌ શરણં પ્રપદ્યે ॥ ૧૫॥

શ્રીશ શ્રિયા ઘટિકયા ત્વદુપાયભાવે
પ્રાપ્યે ત્વયિ સ્વયમુપેયતયા સ્ફુરન્ત્યા ।
નિત્યાશ્રિતાય નિરવદ્યગુણાય તુભ્યં
સ્યાં કિઙ્કરો વૃષગિરીશ ન જાતુ મહ્યમ્ ॥ ૧૬॥

॥ ઇતિ વેઙ્કટેશપ્રપત્તિ ॥

## અથ વેઙ્કટેશમઙ્ગલાશાસનમ્ ।

શ્રિયઃ કાન્તાય કલ્યાણનિધયે નિધયેઽર્થિનાં
શ્રીવેઙ્કટનિવાસાય શ્રીનિવાસાય મઙ્ગલમ્ ॥ ૧॥

લક્ષ્મી સવિભ્રમાલોકસુભ્રૂવિભ્રમચક્ષુષે
ચક્ષુષે સર્વલોકાનાં વેઙ્કટેશાય મઙ્ગલમ્ ॥ ૨॥

શ્રીવેઙ્કટાદ્રિશૃઙ્ગાઙ્ગ્રમઙ્ગલાભરણાઙ્ઘ્રયે
મઙ્ગલાનાં નિવાસાય શ્રીનિવાસાય મઙ્ગલમ્ ॥ ૩॥

સર્વાવયવસૌન્દર્યસમ્પદા સર્વચેતસાં
સદા સમ્મોહનાયાસ્તુ વેઙ્કટેશાય મઙ્ગલમ્ ॥ ૪॥

નિત્યાય નિરવદ્યાય સત્યાનન્દચિદાત્મને
સર્વાન્તરાત્મને શ્રીમદ્વેઙ્કટેશાય મઙ્ગલમ્ ॥ ૫॥

સ્વતસ્સર્વવિદે સર્વ શક્તયે સર્વશેષિણે
સુલભાય સુશીલાયા વેઙ્કટેશાય મઙ્ગલમ્ ॥ ૬॥

પરસ્મૈ બ્રહ્મણે પૂર્ણકામાય પરમાત્મને
પ્રયુઞ્જે પરતત્ત્વાય વેઙ્કટેશાય મઙ્ગલમ્ ॥ ૭॥

આકાલતત્ત્વમશ્રાન્તં આત્મનામનુપશ્યતાં
અતૃપ્તામૃતરૂપાય વેઙ્કટેશાય મઙ્ગલમ્ ॥ ૮॥

પ્રાયસ્સ્વચરણૌ પુંસાં શરણ્યત્વેન પાણિના
કૃપયાऽऽદિશતે શ્રીમદ્વેઙ્કટેશાય મઙ્ગલમ્ ॥ ૯॥

દયામૃત તરઙ્ગિણ્યાસ્તરઙ્ગૈરિવ શીતલૈઃ
અપાઙ્ગૈઃ સિઞ્ચતે વિશ્વં વેઙ્કટેશાય મઙ્ગલમ્ ॥ ૧૦॥

સ્રગ્ભૂષામ્બરહેતીનાં સુષમાવહમૂર્તયે
સર્વાર્તિશમનાયાસ્તુ વેઙ્કટેશાય મઙ્ગલમ્ ॥ ૧૧॥

શ્રીવૈકુણ્ઠવિરક્તાય સ્વામિપુષ્કરિણીતટે
રમયા રમમાણાય વેઙ્કટેશાય મઙ્ગલમ્ ॥ ૧૨॥

શ્રીમત્સુન્દરજામાતૃમુનિમાનસવાસિને
સર્વલોકનિવાસાય શ્રીનિવાસાય મઙ્ગલમ્ ॥ ૧૩॥

મઙ્ગલાશાસનપરૈર્મદાચાર્ય પુરોગમૈઃ
સર્વૈશ્ચ પૂર્વૈરાચાર્યૈઃ સત્કૃતાયાસ્તુ મઙ્ગલમ્ ॥ ૧૪॥

॥ ઇતિ વેઙ્કટેશમઙ્ગલાશાસનમ્ ॥

॥ ૐ તત્સત્ ॥

Encoded by Srinivas Sunder

Proofread by Srinivas Sunder, PSA Easwaran, NA

*Shri Venkatesha Suprabhatam*

pdf was typeset on January 12, 2024

Please send corrections to *sanskrit@cheerful.com*